JAGRAN Josh your guide to success

WWW.JAGRANJOSH.COM

# आईएएस मुख्य परीक्षा 2011 : संस्कृत प्रथम प्रश्न-पत्र

**SANSKRIT**

**Paper I**

**(Literature)**

**Time Allowed: Three Hours** **Maximum Marks: 300**

**INSTRUCTIONS**

Candidates should attempt Question Nos. **1** and **5** which are compulsory, and any **three** of the remaining questions, selecting at least one question from each Section.

The number of marks carried by each question is indicated at the end of the question.

Question Nos. **1**, **5** and **8** must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.

Answers written in Sanskrit must be In Devanagari script.

## Section 'A'

1. (a) अधोलिखितान् समादधत **संस्कृतेन** — 1×3=3

   (i) ञम् प्रत्याहारे के वर्णाः ?

   (ii) का संहिता-संज्ञा ?

   (iii) वाच्यपरिवर्तनं क्रियताम् —

   गोपो गां दुग्धं दोग्धि ।

(b) अधोनिर्दिष्टानां पदाना सूत्रोल्लेखपूर्वकं **संस्कृतगिरा** सन्धिविच्छेदः कार्यः । 3×4=12

कृष्णर्द्धिः, सैषा, उपर्युपरि, सन्नच्युतः ।

(c) अधोलिखितवाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्यौचित्यं नियमोल्लेखपूर्वकं **संस्कृतेन** ज्ञापयत । 4×5=20

   (i) <u>हरिः</u> सेव्यते ।

   (ii) पाचकः <u>पाकाय</u> याति ।

   (iii) <u>हिमवतः</u> गङ्गा प्रभवति ।

   (iv) <u>व्रतदिनम्</u> उपवसन्ति धार्मिकाः ।

   (v) शिष्योऽयं <u>काव्यशास्त्रे</u> अधीती ।

(d) समासो विधीयताम्; समासनामापि उल्लिख्यतां **संस्कृतमाध्यमेन** — 5×5=25

   (i) शक्तिमनतिक्रम्य ।

   (ii) पूर्वमहः ।

   (iii) रथं करोति यः सः ।

   (iv) दधि च पयश्च ।

   (v) सर्पेण दष्टः ।

2. (a) भाषाविज्ञानदृशा संस्कृतस्य महत्त्वं निरूप्यताम् । 30

(b) वैदिक-लौकिकसंस्कृतयोः उपसर्गप्रयोग-विचारः कार्यः । 30

3. (a) बृहत्त्रय्यां परिगणितानां काव्यानां तुलनात्मकं समीक्षणं क्रियताम् । 30

(b) वैयासिकं महाभारतमाश्रित्य रचितानां कस्यापि नाटकद्वयस्य समालोचकदृशा विवेचनं क्रियताम् । 30

4. (a) 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' — कथनमिदं सुष्ठु विवेचनीयम् । 30

(b) वाक्यं रसात्मकं काव्यम् — सम्यग् व्याख्येयम् । 30

## Section 'B'

5. अधोलिखितेषु यथाकामं विषयद्वयमवलम्ब्य सुरगिरा नागराक्षरैश्च प्रत्येकं 175 शब्दपरिमितं निबन्धद्वयं विरच्यताम् । — 30+30=60

Write *two* essays in Sanskrit, in about 175 words, taking any *two* of the topics given below : (Write in Devanagari script only). 30+30=60

(a) यत्र नार्यस्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।

(b) कृषिव्यवस्था नगरस्थापनं च — कुतः समन्वयः ।

(c) विभेदवादः, जातीयसहतिश्च ।

(d) विद्यायतनेषु हिंसा, तन्निरोधोपायाश्च ।

6. (a) प्राचीनभारतीयवर्णाश्रमव्यवस्थाऽद्यतनीयश्च समाजः; तुलनात्मकसमीक्षा कार्या । 30

(b) वास्तुशास्त्र-विज्ञानक्षेत्रे किं प्राचीनयुगमतिशेते वर्तमान-युगम् ? सुष्ठु निरूप्यताम् । 30

7. (a) 'नानुपलब्धे, न निर्णीतेऽर्थे न्यायः प्रवर्तते; किन्तु सन्दिग्धे' — कथनमिदं सम्यक्तया निरूप्य न्यायसिद्धान्तान् प्रतिपादयत। 30

(b) लोकायत-संप्रदायस्य प्रमुखान् सिद्धान्तान् विवेचयत। 30

8. अधोलिखित-सन्दर्भं सावधानतया पठित्वा अन्ते प्रदत्तानां प्रश्नानां सम्यगुत्तरं **संस्कृतेन** प्रदीयताम्। 10×6=60

Read the following passage carefully and answer the questions that follow in *Sanskrit* : 10×6=60

उपनिषदः पराविद्येतिपदेन व्यपदिश्यन्ते। 'ब्रह्मविद्या' इत्येतया अपरया च सञ्ज्ञया सुविदितास्ता विदुषां संसारे। तासु महर्षय आध्यात्मिक्या विद्याया गूढतमानां रहस्यानां विशदतया विचारं कुर्वाणाः प्राप्यन्ते। भारतीयदर्शनसाहित्ये सन्ति त्रयः प्रस्थानग्रन्थाः। ते वेदान् अवलम्बमाना मानवजीवनस्य परमं लक्ष्यं तत्प्राप्तिसाधनञ्चोपदिशन्ति। भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वाद् उपनिषदः प्रस्थानत्रय्यां प्रथमप्रस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति कथ्यते। बादरायणव्यासप्रणीतं ब्रह्मसूत्रं तृतीयंप्रस्थानमस्ति। तत्र आपाततो विरोधिभूतानामुपनिषद्वाक्यानां समन्वयस्तथा कृतो येन ज्ञातं स्यात् तेषां सर्वेषामपि वाक्यानां ब्रह्मनिष्ठत्वमथ च तार्किकाणां युक्तयोऽपि प्राबल्येन निराकृताः सन्ति। भारतीया वैदिकधर्मग्रन्था दर्शनानि च इमामेव प्रस्थानत्रयीमवलम्बन्ते। उपनिषदां गीताब्रह्मसूत्रयोराश्रयप्रदायिनीत्वात् ताः सन्ति महनीयतमाः।

उपनिषदामध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूताऽविद्या नश्यति, ब्रह्म प्राप्त भवति, दुःखानि च क्षीणानि भवन्ति। ब्रह्मणः स्वरूपस्य तदवाप्त्युपायस्य जीवस्य जगतश्च किञ्चात्मादिविषयाणां सविस्तरं वर्णनपरत्वाद् 'उपनिषद' इत्येषा संज्ञा यक्तैव सार्थका च।

(a) किं पराविद्येतिपदेन व्यपदिश्यते ? का चाऽपरा संज्ञा ?

(b) को वर्ण्यविषय उपनिषदाम् ? उपनिषदामपरं नाम किम् ?

(c) भारतीयदर्शनसाहित्ये कति प्रस्थानग्रन्थाः ? के च ते ?

(d) बादरायणप्रणीतब्रह्मसूत्रे किं वर्णितमस्ति ?

(e) उपनिषदामध्ययनेन कि भवति ?

(f) उपनिषदिति संज्ञा कथ युक्ता ? निर्वचनं क्रियताम् ?